## संस्कृत-वार्ता:

**दिनाङ्क :.09.01.2026** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारत-अमेरिका-देशौ अमेरिकादेशेन सह द्वैपाक्षिक-व्यापार-सन्धिं कर्तुं प्रतिबद्धौ स्तः।

- गृह-मन्त्री अमितशाहः अद्य आभासीय-माध्यमेन राष्ट्रिय-आई. ई. डी. दत्तांश-प्रबन्धन-प्रणाल्याः उद्घाटनं विहितवान्।

- केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अद्य उक्तवान् एककोटिः यूनः निर्मातृ-अर्थव्यवस्थया योजयितुं केन्द्रस्य लक्ष्यम् अस्ति।

- बैडमिंटन-क्रीडायाम् भारतीय-क्रीडिका पी. वी. सिन्धुः कुआला-लंपुरे मलेशिया-मुक्त-बैडमिंटन-प्रतियोगितायाः उपान्त्य-चक्रे प्रविष्टा।

**भारत-अमेरिका-व्यापार-सन्धिः**

विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारत-अमेरिका-देशौ अमेरिकादेशेन सह द्वैपाक्षिक-व्यापार-सन्धिं कर्तुं प्रतिबद्धौ स्तः। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् श्रीजायसवालः अवदत् यत् सन्तुलितं परस्परम् लाभप्रदं च व्यापारसमन्वयं प्राप्तुं उभौ पक्षौ बहुवारं वार्तालापं कृतवन्तौ। सः अवदत् यत्, द्वयोः अर्थव्यवस्थयोः मध्ये परस्परम् लाभप्रदं व्यापार-व्यवहारे भारतस्य रुचिः अस्ति, तथा च भारतं तत् पूरयितुं उत्सुकः अस्ति।

**अमितशाहः-आई. ई. डी.**

गृह-मन्त्री अमितशाहः अद्य आभासीय-माध्यमेन राष्ट्रिय-आई. ई. डी. दत्तांश-प्रबन्धन-प्रणाल्याः उद्घाटनं विहितवान्, यत् देशस्य आई. ई. डी. तथा आन्तरिक-सुरक्षा-संरचनायाः सुदृढीकरणार्थं महत्त्वपूर्णं पदाक्षेपम् अस्ति। अस्मिन् अवसरे श्रीशाहः अवदत् यत् नूतनव्यवस्थायाः आरम्भेन अन्तर-संस्था-समन्वयः अपि बहु उत्तमः भविष्यति। सः अवदत् यत्, सम्यक् समये, सम्यक् स्थाने च सम्यक् सूचनां दातुं एषः अतीव प्रभावी: उपायः भविष्यति।

**अश्विनी-वैष्णवः**

केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अद्य अधोरेखितवान् यत् प्रसार-भारती इत्यस्य वेव्स्-मञ्चः व्यापकरूपेण वैश्विकप्रशंसाम् अवाप्नोत् तथा च पञ्च सहस्रकोटिरूप्यकाणां अन्ताराष्ट्रियव्यापारं समर्जितवान्। डी. डी. न्यूज वाहिन्यां क्रियेटर्स् कार्नर् इति नूतनस्य मञ्चस्य उद्घाटने श्री वैष्णवः इदम् उक्तवान्।

**लालू-न्यायालय:**

आर्. जे. डी. इति राष्ट्रिय-जनता-दलस्य अध्यक्षाय, लालू-प्रसाद-यादवस्य तथा तस्य कुटुम्बस्य सदस्यानां कृते दिल्ली-न्यायालयेन अद्य केन्द्रीय-अन्वेषण-विभागेन परीक्षितस्य कथित-रेल्-भूम्यां वृत्यावसर-भ्रष्टाचार-प्रकरणस्य अभियुक्तानां विरुद्धं आरोपपत्रं पत्रितम्। राऊस एवन्यू न्यायालयेन आदेशः प्रदत्तः यत् लालू प्रसाद यादव- तस्य पत्नी राबडी देवी इत्येतयोः, संततीनां तेजस्वी यादव, तेज प्रताप यादव, मीसा भारती, हेमा यादवानां च विरुद्धं भ्रष्टाचारस्य, कपटस्य, आपराधिक-षड्यन्त्रस्य च प्रकरणं कल्प्यते।

**राजनाथ-रक्षोत्पादः**

रक्षामंत्री राजनाथसिंहः अवदत् यत्, रक्षाक्षेत्रं उत्पादने स्वावलम्बी भवितुं प्रावर्तते। मन्त्री अद्य उत्तरप्रदेशे स्वस्य निर्वाचनक्षेत्रस्य लखनऊ-नगरस्य सरोजिनी-नगरक्षेत्रे ई. वी.-वाहन-सन्यन्त्रस्य उद्घाटनानन्तरं सभां सम्बोधयन् आसीत्। अस्मिन् अवसरे केन्द्रीयमन्त्री एच. डी. कुमारस्वामी, मुख्यमन्त्री योगी आदित्यनाथ: च उपस्थितौ आस्ताम्। श्रीसिंहः अवदत् यत्, रक्षा-उत्पादनं यत् पूर्वं षट्चत्वारिंशत् सहस्रकोटिरूप्यकाणि वार्षिकम् आसीत् तत् अधुना पञ्चदशमलवोत्तरैक लक्षकोटिरूप्यकाणि यावत् वर्धितम् अस्ति।

**प्रधानमन्त्री- सोमनाथम्**

प्रधानमन्त्री नरेन्द्रमोदी श्वः गुजरातराज्यस्य त्रिदिवसीय यात्रायां भविष्यति। प्रधानमन्त्री सायङ्काले सोमनाथं गत्वा ओंकारमन्त्रस्य जपे भागं ग्रहीष्यति। सः सोमनाथ-मन्दिरे ड्रोन-प्रदर्शन-कार्यक्रमम् अपि द्रष्टुं शक्नोति। रविवासरे प्रधानमन्त्री सोमनाथमन्दिरस्य रक्षणार्थं प्राणाहुतिं कृतानां असंख्य-योद्धृणां सम्माने आयोजिते औपचारिकयात्रायां भागं ग्रहीष्यति। पश्चात् दिने, प्रधानमन्त्री कच्छ-सौराष्ट्र-क्षेत्रयो: कृते आयोजिते वायब्रेन्ट-गुजरात-क्षेत्रीयसम्मेलने भागं ग्रहणाय राजकोट-नगरं गमिष्यति। प्रथम-ज्योतिर्लिङ्गे चतुर्दिवसीयः सोमनाथ-स्वाभिमान्-पर्वाय, पवित्रं सोमनाथ-नगरं दिव्य-दृश्यरूपेण परिवर्तितम् अस्ति। प्रधानमन्त्री नरेन्द्रमोदी श्वः उत्सवेषु भागं ग्रहणाय तत्र संप्राप्स्यति, अतः सम्पूर्णः प्रदेशः आध्यात्मिक-उत्साहेन, राष्ट्रिय-परिचयस्य गहन-भावनया च प्रतिध्वनितः अस्ति।सोमवासरे प्रधानमन्त्री अहमदाबाद्-नगरे जर्मन्-चान्सलर् फ्रेडरिक-मर्ज इत्यनेन सह मेलनं करिष्यति। प्रधानमन्त्रिणः मोदिनः आमन्त्रणे चान्सलर् मर्ज-वर्यः जनवरीमासस्य द्वादश-त्रयोदश दिनाङ्कयोः भारतस्य आधिकारिकयात्रायाम् आगमिष्यति। इदं तस्य भारतस्य प्रथमम् आधिकारिकं भ्रमणम् भविष्यति। उभौ नेतारौ साबरमती-आश्रमं गत्वा साबरमती-नद्याः पार्श्वे अन्ताराष्ट्रिय-वाताट-महोत्सवे भागं ग्रहीष्यतः। तदनन्तरं गान्धीनगरस्य महात्मा-मन्दिरे उभयोः देशयोः मध्ये वार्तालापं भविष्यति।

## जम्मू-तापमानम्

केन्द्रशासितप्रदेशे जम्मू-कश्मीरे तीव्रः शैत्यतरङ्गः व्याप्तः, यत्र अनेकेषु स्थानेषु अद्य अस्य वर्षस्य ऋतुकालस्य न्यूनतमं तापमानं अभिलिखितम्। जम्मू-प्रदेशे अनेकेषु स्थानेषु रात्रौ तापमानं न्यूनम् अभवत्।

## जयशङ्करः

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य पैरिस-नगरे फ्रान्स्-देशस्य राष्ट्रपतिना इमेनुएल मैक्रॉ इत्यनेन सह मिलितवान्। सामाजिकान्तर्जालीये सन्देशे, डा. जयशङ्करः समकालीन-वैश्विक-विकासविषये तस्य दृष्टिकोणम्, सामरिकसहभागित्वविषये तस्य सकारात्मक-भावं च प्रशंसितवान्। विदेश-मन्त्री फ्रान्स्-देशस्य राजदूतानां सम्मेलनम् अपि सम्बोधितवान् यत्र सः वाणिज्येन, वित्तेन, तन्त्रज्ञानेन, ऊर्जया, संसाधनैः, सम्पर्केन च चालितं समकालीनं वैश्विकपरिवर्तनम् अधोरेखितवान्। सः बहुध्रुवीयतायाः सामरिक-स्वायत्ततायाः च प्रोत्साहने भारत-फ्रान्स्-सहभागित्वस्य महत्त्वम् अपि अवोचत्।

## ईरान-प्रदर्शनम्

इरान्-देशे प्रशासनं विरुध्य प्रदर्शनं त्रयोदशतमे दिने सर्वेषु एकत्रिंशत् प्रान्तेषु प्रसृतः अतः प्रायः सम्पूर्णे राष्ट्रे-अन्तर्जालसेवा-बाधिता। नेट्-ब्लाक्स् इति निरीक्षण-समूहेन उक्तं यत्, जनवरी-मासस्य अष्टमे दिनाङ्के सायङ्काले, नवमे दिनाङ्के प्रातः पर्यन्तम् च सम्पूर्णे देशे सम्पर्कः तीव्ररूपेण न्यूनीकृतः, तथा चलदूरवाणीसेवापि बाधिता। अधिकारसमूहाः कथयन्ति यत् दिसम्बर-मासस्य अष्टाविंशति दिनाङ्के अशांतेः अनन्तरं बालैः सह न्यूनातिन्यूनं पञ्चचत्वारिंशत् प्रदर्शनकारिणः मारिताः, द्वाविंशतिशततोप्यधिकाः जनाः निगडिताः।

## सेन्सेक्स्-सूचकाङ्कः

मानक-देशीय-समता-सूचकाङ्कः, सेन्सेक्स, निफ़्टी च अद्य सप्त- दशमलवोत्तर-शून्य प्रतिशतात् अधिकं पतितम्, येन तेषां हानिप्रवृत्तिः पञ्चम-सत्रं यावत् प्रसितः। सेन्सेक्स्-सूचकाङ्कः पञ्चोत्तर-षट्-शतानि यावत् अङ्कानि पतित्वा प्रायः सार्द्ध त्रय:शीति सहस्राङ्केषु समापितः, निफ़्टी-सूचकाङ्कः चतुर्नवत्यधिकैकशतानि अङ्कानि यावत् पतित्वा प्रायः सार्द्ध त्रय:शीतिसहस्रांकेषु समापितः।

## बैडमिंटन

बैडमिंटन-क्रीडायाम् भारतीय-क्रीडिका पी. वी. सिन्धुः कुआला-लंपुरे मलेशिया-मुक्त-बैडमिंटन-प्रतियोगितायाः उपान्त्य-चक्रे प्रविष्टा। तया जपान-देशस्य अकाने यामागुची इत्येता एकविंशतिः- एकादश, अंकैः पराजिता।